# अध्याय 11 : विद्याधनम्

**प्रश्न 1:**

उपयुक्तकथनानां समक्षम् 'आम्', अनुपयुक्तकथनानां समक्षं 'न' इति लिखत-

(क) विद्या राजसु पूज्यते। [ ]

(ख) वाग्भूषणं भूषणं न। [ ]

(ग) विद्याधनं सर्वधनेषु प्रधानम्। [ ]

(घ) विदेशगमने विद्या बन्धुजनः न भवति। [ ]

(ङ) सर्वं विहाय विद्याधिकारं कुरु। [ ]

**उत्तर 1:**

(क) विद्या राजसु पूज्यते। [आम्]

(ख) वाग्भूषणं भूषणं न। [न]

(ग) विद्याधनं सर्वधनेषु प्रधानम्। [आम्]

(घ) विदेशगमने विद्या बन्धुजनः न भवति। [न]

(ङ) सर्वं विहाय विद्याधिकारं कुरु। [आम्]

**प्रश्न 2:**

अधोलिखितानां पदानां लिङ्गं, विभक्तिं वचनञ्च लिखत-

| पदानि | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|
| नरस्य | ............... | ............... | ............... |
| गुरूणाम् | ............... | ............... | ............... |
| केयूराः | ............... | ............... | ............... |
| कीर्तिम् | ............... | ............... | ............... |
| भूषणानि | ............... | ............... | ............... |

**उत्तर 2:**

| पदानि | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|
| नरस्य | पुँल्लिङ्गम् | षष्ठी | एकवचनम् |
| गुरूणाम् | पुँल्लिङ्गम् | षष्ठी | बहुवचनम् |
| केयूराः | पुँल्लिङ्गम् | प्रथमा | बहुवचनम् |
| कीर्तिम् | सत्रीलिङ्गम् | द्वितीया | एकवचनम् |
| भूषणानि | नपुंसकलिङ्गम् | प्रथमा | बहुवचनम् |

**प्रश्न 3:**

श्लोकांशान् योजयत-

| क | ख |
|---|---|
| विद्या राजसु पूज्यते न हि धनम् | हारा न चन्द्रोज्ज्वलाः। |
| केयूराः न विभूषयन्ति पुरुषम् | न भ्रातृभाज्यं न च भारकारि। |
| न चौरहार्यं न च राजहार्यम् | या संस्कृता धार्यते। |
| सत्कारायतनं कुलस्य महिमा | विद्या-विहीनः पशुः। |
| वाण्येका समलङ्करोति पुरुषम् | रत्नैर्विना भूषणम्। |

**उत्तर 3:**

| क | ख |
|---|---|
| विद्या राजसु पूज्यते न हि धनम् | विद्या-विहीनः पशुः। |
| केयूराः न विभूषयन्ति पुरुषम् | हारा न चन्द्रोज्ज्वलाः। |
| न चौरहार्यं न च राजहार्यम् | न भ्रातृभाज्यं न च भारकारि। |
| सत्कारायतनं कुलस्य महिमा | रत्नैर्विना भूषणम्। |
| वाण्येका समलङ्करोति पुरुषम् | या संस्कृता धार्यते। |

**प्रश्न 4:**

एकपदेन प्रश्नानाम् उत्तराणि लिखत-

(क) कः पशुः?

(ख) का भोगकरी?

(ग) के पुरुषं न विभूषयन्ति?

(घ) का एका पुरुषं समलङ्करोति?

(ङ) कानि क्षीयन्ते?

**उत्तर 4:**

(क) विद्या-विहनीः

(ख) विद्या

(ग) केयूराः

(घ) वाणी

(ङ) भूषणानि

**प्रश्न 5:**

रेखाङ्कितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत–

(क) विद्याविहीन: नर: पशु: अस्ति।

(ख) विद्या राजसु पूज्यते।

(ग) चन्द्रोज्ज्वला: हारा: पुरुषं न अलङ्कुर्वन्ति।

(घ) पिता हिते नियुङ्क्ते।

(ङ) विद्याधनं सर्वप्रधानं धनमस्ति।

(च) विद्या दिक्षु कीर्तिं तनोति।

**उत्तर 5:**

(क) विद्याविहीन: **क:** पशु: भवति?

(ख) **का** राजसु पूज्यते?

(ग) चन्द्रोज्ज्वला: **के** पुरुषं न अलङ्कुर्वन्ति।

(घ) **क:** हिते नियुङ्क्ते।

(ङ) विद्याधनं **कीदृशम्** धनमस्ति।

(च) विद्या **कुत्र** कीर्तिं तनोति।

**प्रश्न 6:**

पूर्णवाक्येन प्रश्नानाम् उत्तराणि लिखत–

(क) गुरूणां गुरु: का अस्ति?

(ख) कीदृशी वाणी पुरुषं समलङ्करोति?

(ग) व्यये कृते किं वर्धते?

(घ) भाग्यक्षये आश्रय: क:?

**उत्तर 6:**

(क) विद्या गुरुणां गुरु: अस्ति।

(ख) संस्कृता वाणी पुरुषं समलङ्करोति।

(ग) व्यये कृते विद्याधानम् वर्धते।

(घ) विद्या नाम भाग्यक्षये आश्रय:।

**प्रश्न 7:**

मञ्जूषातः पुँल्लिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्गपदानि चित्वा लिखत-

विद्या धनम् संस्कृता सततम् कुसुमम् मूर्धजाः पशुः गुरुः रतिः

| | पुँल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| यथा- | हाराः | अलङ्कृता | भूषणम् |
| | .................. | .................. | .................. |
| | .................. | .................. | .................. |
| | .................. | .................. | .................. |

**उत्तर 7:**

| पुँल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|
| मूर्धजाः | विद्या | धनम् |
| पशुः | संस्कृता | सततम् |
| गुरुः | रतिः | कुसुमम् |